केरलापाठावलिः

# संस्कृतम्

## सप्तमी कक्ष्या

संस्कृ तविद्यालयानां कृ ते

# अध्य पकमित्र्

## TEACHER TEXT

### KERALA READER

# SANSKRIT

## Standard – VII

### FOR SANSKRIT SCHOOLS ONLY

Government of Kerala
Department of General Education
State Council of Educational Research and Training (SCERT), Kerala 2024

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः
STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING, KERALA

# भूमिका

प्रवर्तनाधिष्ठिता छात्रकेन्द्रिता च पाठ्यपद्धतिः एव इदानीं प्रचाल्यमाना अस्ति। छात्राणां सर्वतोमुखविकासः एवास्याः पद्धत्याः लक्ष्यम्। छात्राणां स्तरानुसारं विविधैः व्यवहाररूपैः सम्पुष्टमस्ति सप्तमीकक्ष्यायाः पाठ्यपुस्तकं तथा अध्यापकसहायकपुस्तकञ्च। सरलतया प्रवर्तनानाम् अनुशीलनाय प्रवर्तनपुस्तकस्थं प्रवेशकप्रवर्तनं, पाठभागः, पठनप्रवर्तनानि, अनुबन्धः चेति क्रमः एकैकस्मिन् एकके स्वीकृतः। एतेषां प्रवर्तनानाम् आविष्करणाय अध्यापकस्य सहायकं भविष्यतीदं पुस्तकम्। पाठपुस्तके निर्दिष्टानां सर्वेषां प्रवर्तनानाम् आयोजनक्रमः, उत्पन्नरूपेण परिकल्पनीयाः अंशाः, मूल्यनिर्णयसूचकाः च सहायकपुस्तकेऽस्मिन् निर्दिष्टाः भवन्ति। इतोऽप्यधिकानि पठनप्रवर्तनानि कक्ष्यायां परिशीलयितुम् अध्यापकस्य स्वातन्त्र्यमस्ति। लिखितानां प्रवर्तनानां परिशीलनेन छात्राः भाषाप्रयोगे समर्थाः भवेयुः। निरन्तरमूल्यनिर्णयस्य सफलीकरणाय अध्यापकः यतताम्। तदर्थम् अध्यापकसाहाय्यपुस्तकमिदम् उपकारकं भवेत्।अपि च संस्कृतपठनं सर्वथा मधुरं सफलं च भवतु इति आशासे।


भवदीयः

**डा. जयप्रकाश् आर् के**

**निदेशकः**

**राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्**

## TEXT BOOK DEVELOPMENT TEAM

### Advisor

V. Madhavan Pillai, Associate Professor (Rtd.)

### Chairperson

Dr. Harinarayanan M. Asso. Professor & HOD, Dept.of Jyothisha, Govt Sanskrit College, Thiruvananthapuram

### Experts

Dr. Devan E.M, Asst. Professor, Govt. Sanskrit College, Thiruvananthapuram

Dr. Jayakrishnan Nampoothiri N.D, Asst. Professor, Govt. Sanskrit College, Thiruvananthapuram

### Participants

Dr. Chithra V S, GHSS, Thrikkodithanam, Kottayam

Leeba K P, St. Johns U P S Kaloor, Ernakulam

Mayadevi K K, SUPS Thottara, Ernakulam

Rajesh C S, GHS, Chottupara, Idukki

Rajesh Kumar P K, St. Mary's H S S Kaliyar, Idukki

Renjith M R, SABTM UPS, Kureeppally, Kollam

### Academic Co-Ordinator

Smt. Sujitha V

Research Officer SCERT, Kerala.

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः

STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING, KERALA

# विषयानुक्रमणिका


| एककम् | | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|---|
| | केरलपाठ्यपद्धति रूपरेखा २०२३ - संक्षिप्तम् | | | 7 - 31 |
| १ | **समयोऽयं पुरो यास्यति** | १. उद्यमः श्रेयान् | आत्मकथा | 32 - 38 |
| | | २. सर्वे सन्तु निरामयाः | लघूपन्यासः | 39 - 47 |
| २ | **प्रकृतिलावण्यम्** | ३. वर्षर्तुवर्णनम् | काव्यांशः | 48 - 53 |
| | | ४. काननश्रीः | विवरणम् | 54 - 59 |
| ३ | **स्वास्थ्यं वै धनम्** | ५. सुमनसः | लघुनाटकम् | 60 - 67 |
| | | ६. स्वास्थ्यमस्तु | सुभाषितानि | 68 - 74 |

| वार्षिकासूत्रणम् | | | |
|---|---|---|---|
| मासः | पाठः | कालांशः | अनुबन्धप्रवर्तनानि |
| जूण् | उद्यमः श्रेयान् | ८ | नूतनपदानि लिखति। लकारपरिवर्तनं करोति। भारतीयशास्त्रकाराणां सचित्रसम्पुटं निर्माति । वार्तापत्रिकां निर्माति । जीवनचरितं लिखति। यथोचितं योजयति । समानार्थपदानि वर्गीकरोति। |
| जूलै ओगस्त् | सर्वे सन्तु निरामयाः | १० | नूतनपदानाम् अर्थं लिखति। पाठभागस्याशयं वदति लिखति च। पादटिप्पणीं लिखति । भित्तिपत्रिकां रचयति। लृट्लकारमुपयुज्य वाक्यानि लिखति । समानार्थकपदानि वर्गीकरोति । |
| ओगस्त् | सर्वे सन्तु निरामयाः | ४ | संख्याम् अक्षरैः लिखति। अव्ययपदानि वर्गीकरोति । |
| सेप्तम्बर् | वर्षर्तुवर्णनम् | ८ | श्लोकान् समीचीनतया आलपति । श्लोकानाम् अन्वयं लिखति । प्रकृतिसौन्दर्यम् अधिकृत्य टिप्पणीं लिखति । प्रकृतिसौन्दर्यमधिकृत्य नूतनकविताः रचयन्ति । |
| ओक्टोबर् नवम्बर् | वर्षर्तुवर्णनम् काननश्रीः | १६ | अधोदत्तानि अव्ययानि लकारान् च उपयुज्य वाक्यानि लिखति। अमरकोशकारिकां पठित्वा समानार्थकपदानां पट्टिकां पूरयति। पाठभागं पठित्वा आशयमवगत्य लिखति। वनसौन्दर्यमधिकृत्य लिखति।स्वयात्रानुभवं लिखति । नूतनकविताः रचयति। |
| डिसम्बर् | काननश्रीः | ४ | अव्ययानि उपयुज्य वाक्यानि लिखति। पर्यायपदानि लिखति । |
| जनुवरि | सुमनसः | ८ | नाटकं कथारूपेण परिवर्तयति, अनन्तरं कथयति। सम्भाषणावतरणम् । नाटकमधिकृत्य विज्ञापनपत्रस्य निर्माणं करोति । 'लङ् –लृट्' लकारौ वदति लिखति च। 'अस्मद्' शब्दमुपयुज्य वाक्यलेखनम् । |
| फेब्रुवरि | स्वास्थ्यमस्तु | ८ | सुभाषितानि आलपति। सूचनानुसारम् अन्वयं लिखति। व्यायामम् अधिकृत्य लघुटिप्पणीं लिखति । सुभाषितसम्पुटं निर्माति। वाक्यानि चित्रेण सह योजयति । व्यायामम् अधिकृत्य भित्तिपत्रिकां रचयति। समानार्थकपदानि वर्गीकृत्य लिखति । |
| मार्च् | | ४ | पुनरावर्तनम् |

## एककम् १

# समयोऽयं पुरो यास्यति ।

मानवजीवने नैकाः समस्याः अनुभूयन्ते । तासां समस्यानां परिहारः व्यक्तिशः सङ्घशः वा करोति। एवम् अतिजीवनयुक्तौ द्वौ पाठौ एककेऽस्मिन् वर्तेते।

## प्रथमः पाठः

# उद्यमः श्रेयान्

| | |
|---|---|
| **आशयः** | अतिजीवनम् । |
| **उपाशयः** | वैय्यक्तिकातिजीवनम्। |
| **व्यवहाररूपम्** | आत्मकथा |
| **उद्देश्यानि/ लक्ष्याणि** | संस्कृतभाषया लेखनपाटवम् । भाषाप्रयोगः । अतिजीवनसामर्थ्यं व्यक्तित्वविकासः च। |
| **मूल्यम् /मनोभावः** | लब्धावसरमुपयुज्य पुरोगन्तुं मानसिकेच्छाशक्तिः वर्धते । महात्मानुगुणगुणान् प्रकटीकरोति । |
| **पठनलक्ष्याणि** | नूतनपदानि लिखति । लकारपरिवर्तनं करोति। भारतीयशास्त्रकाराणां सचित्रसम्पुटं निर्माति । वार्तापत्रिकां निर्माति । जीवनचरितं लिखति। यथोचितं योजयति । समानार्थपदानि वर्गीकरोति। |
| **पठनक्षमता** | लेखनसामर्थ्यम् । पदज्ञानम्। वाक्यनिर्माणपाटवम्। |
| **कालांशः** | दश |

**पाठस्य आमुखम्**

समाजस्य प्रगत्यै स्वजीवनं समर्पिताः महात्मनः बहवः सन्ति। तेषु प्रमुखः भवति डा.अब्दुल् कलां महाभागः । महापुरुषाणां जीवने प्रायः काश्चन घटनाः सम्भवन्ति। ताः पुनः तेषां जीवनस्य गतिं परिवर्तयन्ति च। अब्दुल् कलां महाशयस्य जीवनसम्बद्धा काचित् घटना पाठेऽस्मिन् समावेशिता वर्तते ।

**प्रवेशकप्रवर्तनम्**

अध्यापिका कक्ष्यां प्रविश्य छात्रान् महात्मनां चित्राणि प्रदर्श्य प्रश्नान् पृच्छति । एतेषां महात्मनां परिचयः अस्ति वा ? तेषां नामानि वदन्तु । महात्मानां विषये किं किं जानन्ति ? अद्य एकस्य महात्मनः जीवने प्रवृत्तां कथां पठामः।

**पाठापग्रथनम्**

भारते अध्यापकः, शास्त्रकारः, मिसैल् मान्, महाज्ञानी, भारतस्य पूर्वतनराष्ट्रपतिः इत्यादि विशेषणैः प्रसिद्धः भवति डा. ए.पि.जे. अब्दुल् कलां महाशयः। अस्य जीवने प्रवृत्तसमस्याः तासां परिहारश्च पाठभागे प्रतिपादितः।

**चित्राणां विशदीकरणम्**

सतीष् धवान्, जि.माधवन् नायर्, सोमनाथन् इत्यादीनां शास्त्रकाराणां चित्राणि।

अब्दुल् कलां महाशयस्य बाल्यकाले उपजीवनाय पत्रिकां वितरति ।

अब्दुल् कलामस्य तथा भारतस्य शास्त्रपैतृकप्रतिपादकं चित्रम्।

## पठनप्रवर्तनानि

**प्रवर्तनम् - १ पठनलक्ष्याणि- नूतनपदानि लिखति।**

पाठभागे विद्यमानानि नूतनपदानि चित्वा स्वटिप्पणीपुस्तके लेखितुं छात्रान् निर्दिशति। लिखितनूतनपदस्य अर्थं स्वयमेव वाचयितुम् अध्यापिका प्रेरयति । पुनः दोषान् निवार्य अध्यापिका क्रोडीकरणं करोति। मूल्यनिर्णयं च करोति । (उद्ग्रथनसाध्यताः- कैरलीभाषायाम् अन्तर्भूततद्भवतत्समसंस्कृतपदानाम् आवलीलेखनम्।) नूतनपदानि चित्रसहितं प्रदर्श्य भाषान्तरीकरणम् translation कर्तुं छात्रान् निर्दिशति।अक्षरकेलिं चालयति । पदानां चिटिकानिर्माणं रिक्तस्थानपूरणं वा कृत्वा अवतारयति।।लेखनावसरे आगतानि स्खालित्यानि संशोधनं करोति। पदानि विलिख्य पदकोशं निर्मातु इति निर्दिशति।

**मूल्यनिर्णयसूचकानि -** अक्षरशुद्धिः, लेखनशुद्धिः।

प्रादेशिकभाषायाम् उपयुज्यमानानां पदानां संस्कृतपदलेखनं करोति।लघुकथा कविता इत्यादीनां वाचनानन्तरं भारतीयभाषासु संस्कृतभाषायाः स्वाधीनं कियत् भवतीति अन्विषति। एवं कक्ष्यायां छात्रैः परिचितानि पदानि उपयुज्य शब्दकोशे

निर्माति प्रकाशयति च।

**प्रवर्तनम् - २ पठनलक्ष्याणि-लकारपरिवर्तनं करोति।**

पाठभागं पठित्वा क्रियापदविवेचनाय छात्रान् निर्दिशतु । अनन्तरं अभ्यासभागे दत्तां पट्टिकां निरीक्ष्य उचितरूपेण पूरयितुं प्रेरयतु । टिप्पणीपुस्तके लेखितुं निर्दिशतु। अध्यापिका स्वालित्यं परिहरतु।(उद्ग्रथनसाध्यताः- आङ्गलभाषायां संस्कृतभाषायां च अन्तर्भूतकालवाचकशब्दानां वाचनं लेखनं च करोति।) पाठनसमये क्लेशम् अनुभवति चेत् लघु-उदाहरणद्वारा पाठयति। ICT द्वारा धातुरूपाणि प्रदर्शयति।सविशेषश्रद्धार्हेभ्यः छात्रेभ्यः अर्थकथनाभ्यासं कारयति। कालवाचकशब्दान् लेखितुं निर्दशति।लकारलेखनावसरे अशुद्धताम् अध्यापिका निवारयति।परिचितानि पदानि उपयुज्य वाक्यसम्पुटं निर्मातुं प्रेरयति।

**मूल्यनिर्णयसूचकानि -** पदज्ञानम्, अर्थज्ञानम्।

शब्दमञ्जर्याः वाचनानन्तरं दशलकाराणां रूपाणि विशिष्य अन्विषति। छात्राः वाक्यसम्पुटं निर्माति।

**प्रवर्तनम् ३ पठनलक्ष्यम्- भारतीयशास्त्रकाराणां सचित्रसम्पुटं निर्माति।**

अध्यापिका भारतीयशास्त्रकाराणां नामानि पृच्छति । छात्राः वदन्ति । पश्चात् तेषां वैविध्यरूपाणि शास्त्रसम्बन्धीनि चित्राणि सञ्चित्य चित्रसंपुटं कर्तुं वदति । छात्राः अवतारयन्ति ।(उद्ग्रथनसमीपनम्- विविधमेखलासु शास्त्रियविषयेषु व्यक्तिमुद्राम् उल्लेखितवतां शास्त्रकाराणां जीवनमधिकृत्य पठनम् ।)प्रवर्तननिर्वहणसमये क्लेशान् अध्यापिका निवारयति। ऐ.सी.टि द्वारा शास्त्रकाराणां जीवनमधिकृत्य वीडियो प्रदर्शनम्। विज्ञापनमेखलासु तात्पर्यं जनयति।शास्त्रकाराणां चित्रं प्रदर्श्य तेषांनामानिकथयति।शास्त्रकाराणां योगदानमधिकृत्य लिखति।सम्पुटनिर्माणावसरे अशुद्धता भवति चेत् अध्यापिका तन्निवारयति।एवं शास्त्रकाराणां चित्राणि संगृह्य सचित्रसम्पुटं निर्माति । शास्त्रकारमधिकृत्य प्रभाषणं लिखति।

**मूल्यनिर्णयसूचकानि -** महात्मनां प्रत्यभिज्ञानम्, अवतरणशैलिः

भारतीयशास्त्रकारान् अधिकृत्य जीवनचरितपठनम्। भारतीयशास्त्रकाराणां योगदानमधिकृत्य अन्विषति।

**प्रवर्तनम् ४ पठनलक्ष्यम्- वार्तापत्रिकां निर्माति।**

अध्यापिका अतिजीवनवार्ताणां पत्रखण्डानि कक्ष्यायां प्रदर्शयतु । ततः पठनाय

छात्रान् निर्दिशतु । पुनः छात्राः वार्तारूपेण संस्कृतभाषायां लिखन्तु। लेखनावसरे शीर्षकं, शैलिः, भाषा इत्यादिषु विषयेषु अध्यापिका साहाय्यं प्रददातु। विविधपत्रिकाभ्यः अतिजीवनवार्ताणां तारतम्यपठनम्। ICT द्वारा लघुवार्तापत्रिकाणां मातृकां प्रदर्शयति। अतिजीवनवार्तायाः वीडियो प्रदर्शनम्।सविशेषश्रद्धार्हेभ्यः छात्रेभ्यः डिजिट्टल् पत्रवाचनं प्रदर्शनं च।प्रतिदिनं पत्रिकां पठित्वा वार्तालेखनाय निर्दिशति। वार्तापत्रिकानिर्माणावसरे जातान् क्लेशान् निवारयति। वार्तापत्रिकां कक्ष्यायाम् अवतारयति।

**मूल्यनिर्णयसूचकानि** - उचितशीर्षकम्, आशयव्यक्तता, उचितपदप्रयोगः ।

अन्यासु भाषासु विद्यमानाः पत्रिकाः पठति। पुरातनवार्तापत्रिकाम् अपेक्ष्य इदानींतन वार्तापत्रिकाणां भेदमधिकृत्य तारतम्यपठनाय अवसरः लभ्यते।

**प्रवर्तनम् ५ पठनलक्ष्यम्- जीवनचरितं लिखति।**

आत्मविश्वासेन समस्याः परिहृत्य जीवने विजयं प्राप्ताः बहवो महात्मानः सन्ति। तेषु प्रमुखः भवति डा.अब्दुल् कलां महाशयः । तस्य जीवनचरितं सूचनामनुसृत्य लेखितुं प्रेरयतु । छायाचित्रम्, चलनचित्रमुद्रिका , भावचित्राणि इत्यादीनां साहाय्येन ऐ.सी.टि साहाय्येन वा कर्तुं प्रेरयतु । लिखितजीवनचरितं छात्राः कक्ष्यायाम् अवतारयन्तु । विविधानां महात्मनां जीवनचरितानि पठति। जीवनचरितलेखनावसरे जायमानान् दोषान् अध्यापिका निवारयति। ऐ.सी.टि द्वारा महात्मनां जीवनमधिकृत्य वीडियो प्रदर्शनम्। पत्रिकासु मासिकासु वा लेखकः। स्वकीयजीवनचरितमधिकृत्य कथयति लिखति च। स्वकीयकुटुम्बजनानधिकृत्य चरितलेखनाय प्रेरयति। जीवनचरितलेखनावसरे अशुद्धता भवति चेत् अध्यापिका तन्निवारयति। जीवनचरितं लिखित्वा अवतारयति प्रकाशयति च।

**मूल्यनिर्णयसूचकानि** - उचितभाषाप्रयोगः, वाक्यघटना, आशयावबोधः

स्वप्रदेशस्य तथा स्वविद्यालयमधिकृत्य चरितं लिखित्वा प्रकाशयति। विशिष्टव्यक्तीनां जीवनचरितपठनम्। पुरावस्तुमेखलासु तत्पराः भवन्ति।

**प्रवर्तनम् ६ पठनलक्ष्यम्- यथोचितं योजयति।**

अध्यापिका यद्यपि – तथापि उपयुज्य वाक्यकथनं समीचीनतया उदाहरणरूपेण श्यामफलके लिखित्वा वाचयति । अनन्तरं पदद्वयम् उक्त्वा वाक्यकथनाय छात्रान् प्रोत्साहयति । अनन्तरं पाठपुस्तकस्थे प्रवर्तनभागे दत्तानि वाक्यानि यथोचितरूपेण

वाक्यपरिवर्तनं कर्तुं छात्रान् निर्दिशति । साहाय्यमपि ददाति ।

उदा- वृष्टिः भवति । उष्णम् अधिकं भवति ।

यद्यपि वृष्टिः भवति तथापि उष्णम् अधिकं भवति ।

आङ्गलेय-हिन्दी-कैरली इत्यादिषु भाषासु उपयुज्यमानां पदानां तारतम्यपठनं करोति। अव्ययपदानि उपयुज्य वाक्यानि लिखति। अव्ययसम्पुटं निर्माति प्रकाशयति च।

**मूल्यनिर्णयसूचकानि -** शुद्धवाक्यलेखनम्, अव्ययानाम् उचितयोजनम्।

अव्ययानाम् अभ्यासपुस्तकानि पठति। अन्यभाषासु प्रयुक्तानि अव्ययानि अन्विषति।

**प्रवर्तनम् ७ पठनलक्ष्यम्- समानार्थकपदानि वर्गीकरोति।**

अध्यापिका पाठपुस्तकान्तर्गतानि पदानि वाचयति । छात्राः चित्रानुसारं यथोचितं योजयति। अनन्तरम् अवतारयति। अवतारणवेलायां मूल्यनिर्णयं कृत्वा उत्तराणि क्रोडीकरोति। इतरभाषासु विद्यमानानि पदानि उपयुज्य योजनम्। योजनावसरे सञ्जातानि स्खालित्यानि संशोधयति। गणवेषाणां चित्राणि प्रत्यभिजानाति। विविधवृत्तीनां लेखनावसरे अशुद्धता भवति चेत् अध्यापिका तन्निवारयति। वृत्तिगणवेषाणां चित्राणि संगृह्य चित्रसम्पुटं निर्माति प्रकाशयति च।

**मूल्यनिर्णयसूचकानि -**

**प्रवर्तनम् ८ पठनलक्ष्यम् - अमरकोशकारिकां पठित्वा समानार्थकपदानि वर्गीकरोति।**

अध्यापिका पाठभागं समीचीनतया वाचयति । तथा पाठभागे प्रदत्तानाम् अमरकोशकारिकाणां पदानि वर्गीकर्तुं निर्दिशति । पदानाम् अर्थानुसारं लेखितुं निर्दिशति । प्रत्येकस्य पदस्य अर्थं ज्ञात्वा विविच्य पट्टिकां कर्तुं निर्दिशति च । छात्राः पट्टिकाम् अवतारयन्ति । अध्यापिका दोषान् निवार्य क्रोडीकरोति । मूल्यनिर्णयमपि करोति । इतरभाषासु विद्यमानानि पदानि अन्विषति। लेखनावसरे साहाय्यं प्रददाति। ऐ.सी.टि द्वारा अमरकोशस्य आप् प्रदर्शयति। पदसम्पुटं निर्माति अवतारयति च।

**मूल्यनिर्णयसूचकानि -** उचितपदप्रयोगः, अक्षरशुद्धिः

अमरकोशकारिकाः चित्वा वाचयति। अमरकोशस्य ,संस्कृतभाषासु विद्यमानैः

कोषग्रन्थैः साकं तारतम्यपठनाय अवसरः लभ्यते।

**अग्रिमपाठसंयोजकप्रवर्तनम्**

शास्त्रपुरोगतिं प्राप्ताः मेखलाः काः इति चर्चां करोतु । तद्वारा आरोग्यमेखलायां शास्त्रपुरोगतिः कियत् प्राप्ता इति चर्चायै निर्दिशति ।

**अनुबन्धः**

ऐ.सी.टी साहाय्येन डा.ए.पि.जे अब्दुल्कलां महाशयस्य जीवनचरितं स्लैड् रूपेण निर्माणं करोतु।

**लङ् लकारः**

| | | |
|---|---|---|
| उपाविशत् | उपाविशताम् | उपाविशन् |
| उपाविशः | उपाविशतम् | उपाविशत |
| उपाविशम् | उपाविशाव | उपाविशाम |

**स्म प्रयोगः**

लट् लकाररूपैः सह स्मप्रयोगेण भूतकालार्थः प्राप्यते।

गच्छति स्म - पिता ह्यः कार्यालयं गच्छति स्म।

## द्वितीयः - पाठः
## सर्वे सन्तु निरामयाः

| | |
|---|---|
| **आशयः** | अतिजीवनम् । |
| **उपाशयः** | महामारिः |
| **व्यवहाररूपम्** | उपन्यासः |
| **उद्देश्यानि /लक्ष्याणि** | लेखनं पठित्वा उपन्यासानां वाचने तात्पर्यम् ।<br>उपन्यासस्य सविशेषतां ज्ञात्वा व्यक्तता, संक्षिप्तता, लालित्यं च प्राप्यते।<br>जीवने अनुभूयमानाः समस्याः सधैर्यं प्रतिरोद्धुं शक्यते। |
| **मूल्यम् /मनोभावः** | सांक्रमिकरोगाणां प्रतिरोधे तात्पर्यम् । शुचित्वपरिपालने (व्यक्तिशुचित्वम्, सामूहिकशुचित्वम्) तात्पर्यम् ।<br>सामूहिकप्रवर्तनेषु भागभागित्वम् । |

**पठनलक्ष्याणि**

नूतनपदानाम् अर्थं लिखति।
पाठभागस्याशयं वदति लिखति च।
पादटिप्पणीं लिखति ।
भित्तिपत्रिकां रचयति।
लृट्लकारमुपयुज्य वाक्यानि लिखति ।
समानार्थकपदानि वर्गीकरोति ।
संख्याम् अक्षरैः लिखति ।
अव्ययपदानि वर्गीकरोति ।

**पठनक्षमता**

वाचने आशयग्रहणे लेखने च सामर्थ्यं प्राप्नोति ।
कालांशः- दश

**पाठस्य आमुखम्**

सुनामि, कोरोणा, जलोपप्लवः ,भूकम्पः इत्याद्याः महामार्यः जीवलोके प्रतिकूलरीत्या

बाधिताः । एताभ्यः अतिजीवनं वयं प्राप्तवन्तः । तदर्थं मानवानाम् ऐक्यं सहवर्तित्वं शास्त्रबोधः च बहुधा साहाय्यकम् अभवत् ।

**प्रवेशकप्रवर्तनम्**

अध्यापिका कक्ष्यां प्रविश्य पाठपुस्तके प्रवेशकप्रवर्तनाय दत्तं चित्रं (मुखावरणयुक्तायाः भूमेः) प्रदर्श्य लघुचर्चां प्रचालयति ।

चर्चासूचकानि

कारणं किम् ?

कोरोणा, निपा ...... इत्यादीः महामारीः चाधिकृत्य चर्चां प्रचालयतु । एताभ्यः महामारिभ्यः रक्षां प्राप्तुम् एतादृशाः प्रतिरोधमार्गाः आवश्यकाः । तर्हि अद्य महामारिभ्यः अतिजीवनं कथमिति पाठेऽस्मिन् पठामः ।

**पाठापग्रथनम्**

अस्मिन् पाठभागे कोरोणा, निपा, एबोला इत्यादीनां महामारिणां सामान्यपरिचयः, ततः अतिजीवनं मानवराशेः जीवनशैलीपरिवर्तनं च प्रतिपाद्यते।

**चित्राणां विशदीकरणम्**

प्रथमं चित्रम्-मुखावरणयुक्तायाः भूमेः चित्रम्।

द्वितीयं चित्रम्-कोरोणारोगाणोः आदर्शचित्रम्।

तृतीयं चित्रम्-सामूहिकदूरस्य चित्रम्।

## पठनप्रवर्तनानि

**प्रवर्तनम् १ पठनलक्ष्यम्- नूतनपदानामर्थं लिखति ।**

अध्यापिका छात्रान् सङ्घान् कृत्वा पाठभागस्य समग्रवाचनाय निर्दिशतु। वाचनावसरे कठिनपदानां , संश्लिष्टपदानां, समस्तपदानां च लेखनाय प्रेरयतु। प्रतिसङ्घः कक्ष्यायाम् अवतारयतु। अनन्तरं वैय्यक्तिकरीत्या पाठभागस्य सस्वरवाचनाय अवसरः अपि दातव्यः । वाचनावसरे स्खालित्यानि उच्चारणदोषाः च परिहरतु। ततः नूतनपदानाम् आशयं शब्दकोशं निरीक्ष्य लेखितुं छात्रान् निर्दिशतु । छात्रैः उक्तानां पदानां तेषामाशयः च श्यामफलके अध्यापिका लिखतु। छात्राः

टिप्पणीपुस्तके लिखन्तु । अध्यापिका मूल्यनिर्णयमपि करोतु। (**उद्ग्रथितसमीपनम् आङ्ग**लेय-हिन्दी-कैरली इत्यादिषु भाषासु उपयुज्यमानपदानां संयोजनेन तारतम्यलेखनं पठनं च।) कठिनपदानां समस्तपदानां च उच्चारणपरिशीलनं कारयति। नूतनपदानाम् अर्थं यथोचितं योजनाय निर्दिशतु। समानार्थकपदानां सम्पुटं लिखति। लघुशब्दकोशं निर्माय प्रकाशयति।

**मूल्यनिर्णयसूचकानि** - पदबोधः, अर्थज्ञानम्

समानार्थकपदान्युपयुज्य वाक्यानि परिवर्त्य लिखति ।नूतनपदानि उपयुज्य वाक्यनिर्माणं करोति।

संस्कृतलेखनानां वाचनम्। पदानां व्याकरणदृष्ट्या व्युत्पत्तिः कथमिति अन्विषति।

**प्रवर्तनम् २ पठनलक्ष्यम्- पाठभागस्य आशयं वदति लिखति च।**

अध्यापिका सङ्घद्वये वर्गीकरोति। ततः पाठभागमधिकृत्य प्रश्नान् निर्मातु । लेखितुमपि प्रेरयतु । ततः एकस्मिन् सङ्घे वर्तमानाः छात्राः अन्यसङ्घान् प्रति प्रश्नान् पृच्छन्तु । द्वितीयसङ्घस्थाः छात्राः उत्तराणि वदन्तु।अनन्तरं प्रथमसङ्घं प्रति प्रश्नान् पृच्छतु । एवम् अनुवर्तते । अध्यापिका संशोध्य क्रोडीकरोतु । पुनः छात्राः टिप्पणीपुस्तके लिखन्तु ।अध्यापिका मूल्यनिर्णयं करोतु । अन्ते उत्तराणि समायोज्य लघूपन्यासमपि लिखन्तु ।

प्रश्नाः प्रायेण एते भवेयुः-

का नाम महामारिः ?

कोविड् महामारिः कदा आरब्धा?

महामार्याः प्रतिरोधमार्गाः के?

जन्तुजन्यरोगाः के?

कोविड्-रोगाणुः केभ्यः जन्तुभ्यः प्रथमतया प्रत्यभिज्ञातः?

अनन्तरम् अध्यापिका पुनरभ्यासाय निपा एबोला प्लेग् कासरोगः कोलरा इत्यादीन् अधिकृत्य लघुटिप्पणीलेखनाय निर्दिशतु । जीवशास्त्रविषयान् पठित्वा अनेन पाठेन सह योजनेन प्रश्नोत्तरनिर्माणं कारयति। प्रश्नवाचकशब्दानां सप्तककाराणां प्रयोगे संजातान् दोषान् निवारयति। प्रश्नोत्तरप्रदर्शनम्। विविधान् विषयान्

अधिकृत्य संवादेषु साध्यताः सन्ति।

प्रशानवाचकशब्दानां लेखनम्। उदा- किं, कुत्र, कति.......................

प्रश्नवाक्यानां लेखनम्।

उदा-भवतः नाम किम्?

ताजमहाल् कुत्र वर्तते?

प्रश्नोत्तरलेखनावसरे संजातान् भाषादोषान् निवारयितुं संशोधनमातृकाः स्वीकरणीयाः।

प्रश्नोत्तरचिटिकां निर्माय अवतारयति।

**मूल्यनिर्णयसूचकानि -** उचितभाषाप्रयोगः, विषयबोधः, आशयावबोधः।

पाठभागसम्बद्धं चित्रं प्रदश्र्य प्रश्नानां कथनम् उत्तरलेखनं च। इतरोपन्यासान् पठित्वा प्रश्नोत्तराणि लिखति आरोग्यसम्बद्धानाम् इतरपुस्तकानि पठितुं प्रेरयति।

**प्रवर्तनम् ३ पठनलक्ष्यम्- पादटिप्पणीं लिखति।**

अध्यापिका पाठपुस्तके दत्ताः पादटिप्पणीः चार्ट्-पत्रे विलिख्य प्रदर्शयतु । वाक्यानाम् आशयं वक्तुं छात्रान् निर्दिशतु । आशयावगमनानन्तरं पाठपुस्तकस्थं प्रवर्तनं वैय्यक्तिकरीत्या कर्तुं छात्रान् निर्दिशतु ।अध्यापिका मूल्यनिर्णयं करोतु। आरोग्यसम्बद्धानि चित्राणि दृष्ट्वा पादटिप्पणीलेखने तात्पर्यं जनयति। लेखनावसरे संजातान् दोषान् निवारयति। पादटिप्पणीमातृकाः प्रदर्शयति। विविधासु विज्ञापनमेखलासु अवसरः लभते। चित्रानुसारं वाक्यानि योजयित्वा पादटिप्पणीं लिखति। सर्गात्मकतया वाक्यलेखनाय प्रेरयति।

उदा- बालवृक्षान् रोपयतु ।

जलमेव परं धनम् ।

पादटिप्पणीलेखनावसरे आगतानि स्खालित्यानि निवारयितुं संशोधनमातृकाः स्वीकरणीयाः। संक्षिप्तता आकर्षकता सर्गात्मकता इत्याद्याः भवेयुः।

परिस्थितिसंरक्षणम् आरोग्यं वाचनदिनम् इत्यादीनि विशेषदिनानि अधिकृत्य पादटिप्पणीसम्पुटनिर्माणाय निर्दिशति।

**मूल्यनिर्णयसूचकानि -** विषयबन्धः, संक्षिप्तता, आकर्षकत्वम्।

नूतनपादटिप्पणीं वैविध्यपादटिप्पणीं च लिखति कक्ष्यायाम् अवतारयति ।

**प्रवर्तनम् - ४ पठनलक्ष्यम्- भित्तिपत्रिकाः रचयति ।**

वैद्येन सह अभिमुखं कृत्वा अभिमुखभाषणानां वीडियोप्रदर्शनद्वारा वा अध्यापिका विविधसाङ्क्रमिकरोगाणां नामानि विलिख्य तेषां प्रतिरोधमार्गान् च विज्ञाप्य भित्तिपत्रिकायाः रचनायै प्रेरयतु । विविधाः भित्तिपत्रिकामातृकाः प्रदर्शयति। सर्गात्मकतादृष्ट्या भित्तिपत्रिकासु नूतनवाक्यलेखनम्। उदा- विविधासु मासिकासु। भित्तिपत्रिकाः वर्णैः लिम्पतु। भित्तिपत्रिकासु वाक्यलेखनम्। भित्तिपत्रिकायाः निर्माणावसरे आगतान् दोषान् निवारयितुं संशोधनमातृकाः स्वीकरणीयाः।

सांक्रमिकरोगान् अधिकृत्य भित्तिपत्रिकासङ्ग्रहं कृत्वा प्रकाशयति।

**मूल्यनिर्णयसूचकानि -** विषयबन्धः, संक्षिप्तता, आकर्षकत्वम्।

ऐ.सी.टि द्वारा डिजिट्टल् भित्तिपत्रिकानिर्माणम्। भित्तिपत्रिकायां नूतनवाक्यानि रचयति। विविधानि लेखनानि आरोग्यसम्बद्धाः मासिकाः च पठति। सर्गात्मकतादृष्ट्या भित्तिपत्रिकासु नूतनवाक्यानि अन्विषति।

**प्रवर्तनम् ५ पठनलक्ष्यम्- लृट् लकारमुपसुज्य वाक्यानि लिखति ।**

രാവിപ്പോൾ ക്ഷണമങ്ങോടുങ്ങിടുമുഷസ്സെങ്ങും പ്രകാശിച്ചിടും.
ദേവൻ സൂര്യനുദിക്കുമീക്കമലവും താനേ വിടർന്നിടും.
ഏവം മൊട്ടിനകത്തിരുന്നളി മനോരാജ്യം തുടർന്നീടവേ
ദൈവത്തിൻ മനോരഥമാരുകണ്ടു? പിഴുതാൻ ദന്തീന്ദ്രനാപ്പത്മിനീ....

अध्यापिका पद्यमिमं चार्ट्-पत्रे वीलिख्य प्रदर्शयतु । आशयं वक्तुं छात्रान् प्रेरयतु । काव्यांशसन्दर्भं विशदयतु। अन्ते ഒടുങ്ങിയും, പ്രകാശിച്ചിടും, ഉദിക്കും, വിടർന്നിടും एतानि पदानि भाविकालार्थे प्रयुक्तानि इति क्रोडीकरोतु । पुनः-

रात्रिर्गमिष्यति भविष्यति सुप्रभातं

भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः।

इत्थं विचिन्तयति कोशगणे द्विरेफे

हा हन्त हन्त नलिनीं गज उज्जहार ।।

इति श्लोकमपि चार्ट् पत्रे प्रदर्श्य भाविकालक्रियापदानां लेखनाय प्रेरयतु । अवश्यं साहाय्यमपि ददातु ।

गमिष्यति, भविष्यति, उदेष्यति, हसिष्यति इत्येतानि पदानि श्यामफलके लिखतु। तेषां वर्तमानकाले क्रियापदानां लेखनमपि करोतु ।

यथा - भवति - भविष्यति।

उदेति - उदेष्यति ।

**क्रीडा**

प्रथमतया छात्राः वर्तुलाकारेण तिष्ठन्तु। एकः छात्रः वृत्तस्य मध्ये तिष्ठतु।अनन्तरं मध्ये स्थितः छात्रः कमपि छात्रं प्रति भवति (लट् लकारः) इति क्रियां वदतु। सः छात्रः भविष्यति (लृट् लकारः) इति उक्त्वा वृत्तस्य मध्ये गच्छतु। प्रथमच्छात्रः यथास्थानं गच्छतु। एवं क्रीडा विविधलट्-लृट्-लकारक्रियापदानि उपयुज्य अनुवर्तयन्तु।यः उचितम् उत्तरं ददाति सः क्रीडायाः बहिर्गच्छतु।

यथा - पठति – पठिष्यति

गच्छामि - गमिष्यामि

लिखसि - लेखिष्यसि

पश्यति - द्रक्ष्यति

ततः छात्रसङ्घान् रूपीकृत्य प्रतिसङ्घं कैरलीवाक्यानि तेषां संस्कृतवाक्यानि च कागतखण्डेषु विलिख्य ददातु ।

यथा-

ഞാൻ നാളെ സിനിമ കാണാൻ പോകും.

अहं श्वः चलच्चित्रं द्रष्टुं गमिष्यति ।

അടുത്തമാസം വിദ്യാലയത്തിൽ നിന്നും കുട്ടികൾ വിനോദയാത്ര പോകും.

आगामिनि मासे विद्यालयात् छात्राः विनोदयात्रां करिष्यन्ति ।

നാളെ അമ്മയുടെ ജന്മദിനം ആഘോഷിക്കും.

श्वः मातुः जन्मदिनाघोषः भविष्यति।

प्रतिसङ्घः आशयानुसारं वाक्यानि योजयतु ।कक्ष्यायाम् अवतारयन्तु। ततः चार्ट्-पत्रे विलिख्य कक्ष्यायां स्थापयतु। पुनः पाठपुस्तके दत्तं प्रवर्तनं वैय्यक्तिकरीत्या लेखितुं छात्रान् निर्दिशतु । अध्यापकः मूल्यनिर्णयमपि करोतु । आङ्गलेय-हिन्दी-कैरली इत्यादिषु अन्यभाषासु उपयुज्यमानानां कालवाचिकशब्दानां संयोजनेन तारतम्यलेखनं पठनं च करोति। लकाराणां लेखनावसरे जातानि स्खालित्यानि उचितरीत्या निर्धारयति। भाषान्तरीकरणमेखलासु तत्पराः भवन्ति। क्रीडाद्वारा लकारपरिवर्तनाभ्यासं सरलरीत्या चालयितुं प्रोत्साहयन्तु। लकारान् परिवर्त्य लिखति। लघुवाक्यलेखनम् । लकाराणां परिवर्तनावसरे संजातान् दोषान् निवारयितुं संशोधनमातृकाः स्वीकरणीयाः। लृट्लकाराणां सम्पुटं निर्माति।

**मूल्यनिर्णयसूचकानि -** लकारज्ञानम्, उचितवाक्यलेखनम्

लकारान् उपयुज्य वाक्यानां परिवर्त्य लेखनम्। लट् लृट् लकारयोः व्यक्ततया शुद्धतया च कथनं लेखनं च। शब्दमञ्जर्याः वाचनम् ।

**प्रवर्तनम् - ६ पठनलक्ष्यम्- समानार्थकपदानि वर्गीकरोति ।**

अध्यापिका अमरकोशकारिकायाः वाचनाय निर्दिशतु। वाचनावसरे अवश्यं साहाय्यमपि करोतु । ततः सङ्घान् रूपीकृत्य सङ्घवाचनाय प्रेरयतु । स्खालित्यानि परिहरतु च। ततः प्रतिसङ्घं कारिकां विविच्य दत्वा कारिकां पठित्वा पदानां विविच्य लेखनाय निर्दिशतु। एकैकः सङ्घः कक्ष्यायाम् अवतारयतु ।अध्यापिका मूल्यनिर्णयमपि करोतु। अनन्तरम् अध्यापिका चार्ट्-पत्रं प्रदर्श्य पदपूरणाय निर्दिशतु। चार्ट्-पत्रे यथा-

( रु, षाः. ञ्च, जाः , नु, मां , म, ता, धिः)

| | |
|---|---|
| १) पु.......सः। | २) मनु...... |
| ३) ..........कु। | ४) पु......षाः। |
| ५) प......जनाः। | ६) आ......यः। |
| ७) उप.....पः। | ८) म......षाः। |
| ९) व्या...........। | |

ततः वैय्यक्तिकरीत्या पाठपुस्तके वर्तमानानां पदानां पट्टिकाकरणाय प्रेरयतु। अन्ते

पुनरभ्यासाय अन्यानि पदानि मिलित्वा ददातु (रोगस्य मनुजस्य च)। पर्यायपदानि वर्गीकर्तुं निर्दिशतु ।

यथा- नराः, रुजा, पञ्चास्य, उपतापः, पञ्चजनाः, पुमांसः...............एवम्।

इतरभाषासु उपयुज्यमानानां पदानां तारतम्यलेखनम्।

समानार्थकपदानां लेखनावसरे संजातानि स्खालित्यानि निर्धारयति।

ऐ.सी.टि द्वारा अमरकोशकारिकां श्रावयति। समानार्थकपदानि योजयति। सूचनामनुसृत्य चित्रसाहाय्येन पदसूर्यनिर्माणं करोति। समानार्थकपदानां लेखनावसरे आगतानि स्खालित्यानि निवारयितुं संशोधनमातृकाः स्वीकरणीयाः। पाठभागे दत्तानां मूषक-मार्जार- कुक्कुट-गौः- अश्वः इत्यादीनां जन्तूनां समानार्थकपदानां सम्पुटं निर्माति।

**मूल्यनिर्णयसूकानि -** आशयग्रहणम्, उचितक्रमीकरणम्

पूर्वकक्ष्यासु पठितानाम् अमरकोशकारिकाणां चयनाय प्रेरयति।

पूर्वोक्तपठितपाठस्य पदैः साकम् अस्य पाठस्य पदानि संयोज्य शब्दकोशनिर्माणं कारयति। इतरामरकोशकारिकाणां वाचनाय प्रोत्साहयति ।इतरशब्दकोशान् अन्विषति । शब्दतारावलिः, निरुक्तम्, वाचस्पत्यम् ....................................

**प्रवर्तनम् - ७ संख्याः अक्षरैः लिखति।**

1927

7 सप्त

27 सप्तविंशतिः

927 सप्तविंशत्यधिकनवशतम्।

1927 सप्तविंशत्यधिकनवशतोत्तरसहस्रम् ।

एवं संख्याः परिशीलयतु। ततः अध्यापिका छात्रसङ्घान् कृत्वा प्रतिसङ्घं कागतखण्डेषु संख्याः विलिख्य ददातु। प्रतिसङ्घः लिखित्वा अवतारयतु। ततः पाठपुस्तकस्थं प्रवर्तनं वैय्यक्तिकरीत्या लेखितुं छात्रान् निर्दिशतु । छात्राः कक्ष्यायाम् अवतारयतु। अध्यापकः संशोध्य मूल्यनिर्णयमपि करोतु।इतरभाषासु संख्यानां गणना। संख्यानां लेखने भाषणे अवतारणावसरे च संजातानि स्खालित्यानि निर्धारयति।

उचितोच्चारणाय प्रेरयति। गणनं श्रावयति। स्वपरिवारजनानां जन्मवर्षमधिकृत्य संस्कृतसंख्यालेखनाय प्रेरयति। वर्षाणां लेखनम्। संख्याम् अक्षरैः लिखिताः चिटिकाः कक्ष्यायाम् अवतारयति प्रकाशयति च । (सविशेषदिनानां महात्मानां जन्मवर्षाणां च।

**मूल्यनिर्णयसूचकानि -** संख्याज्ञानम्,अक्षरशुद्धिः

पूर्वापर्यक्रमेण चरितानां क्रमीकरणम्। अक्षरैः संख्यां लिखति। गणितशास्त्रग्रन्थान् पठितुं तत्परो भवति।

**प्रवर्तनम् - ८ पठनलक्ष्यम् - अव्ययपदानि वर्गीकरोति।**

अध्यापिका पाठभागं सम्यक् पठित्वा क्त्वान्त-तुमुन्नन्त-केवलाव्ययानि चित्वा लेखितुं निर्दिशतु। प्रवर्तनमिदं वैय्यक्तिकरीत्या करोतु। छात्राः कक्ष्यायाम् अवतारयतु। अन्ते मूल्यनिर्णयमपि करोतु।

इतरभाषासु प्रयुक्तानाम् ईदृशानां पदानां तारतम्यपठनम्। अव्ययानां लेखनावसरे जायमानान् दोषान् उचितरीत्या निर्धारयतु।ऐ.सी.टि द्वारा DRAG AND DROP विविधक्रीडाद्वारा अव्ययपदानां परिचायनं कारयति। अव्ययानां सञ्चयं कृत्वा अवतारयति।

उदा- पठति- पठित्वा – पठितुम्- प्रपठ्य

लिखति- लिखित्वा- लेखितुम्- विलिख्य

**मूल्यनिर्णयसूचकानि -** अव्ययज्ञानम्, उचितक्रमीकरणम्

विविधान् विषयान् अधिकृत्य खण्डिकाः दत्वा अव्ययपदानां वर्गीकरणम्।

अव्ययपदानि उपयुज्य वाक्यलेखनम् । विविधानां लेखनानां मासिकानां च वाचनाय प्रोत्साहयतु।

अग्रिमपाठसंयोजकं प्रवर्तनम्- अध्यापिका काले वर्षतु पर्जन्यः इति सुभाषितं श्यामफलके विलिख्य वर्षाकालस्य सविशेषतामधिकृत्य चर्चां करोतु। विविधानि वर्षाकालगानानि कैरल्यां श्रावयन्तु ।

**अनुबन्धः**

ऐ.सी.टी साहाय्येन महामारीणां प्रकृतिक्षोभाणां चित्राणि संगृह्य कोलाष् निर्मातु।